# Devaih Kritam Dharma Stotram

# દેવૈઃ કૃતં ધર્મસ્તોત્રમ્

## Document Information

Text title : Devaih Kritam Dharma Stotram

File name : devaiHkRRitaMdharmastotram.itx

Category : deities_misc, stotra, varAhapurANa

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 32/20-33||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# દેવૈઃ કૃતં ધર્મસ્તોત્રમ્

દેવા ઊચુઃ ।
નમોઽસ્તુ શશિસઙ્કાશ નમસ્તે જગતઃ પતે ।
નમોઽસ્તુ દેવરૂપાય સ્વર્ગમાર્ગપ્રદર્શક ।
કર્મમાર્ગસ્વરૂપાય સર્વગાય નમો નમઃ ॥ ૨૦॥

ત્વયેયં પાલ્યતે પૃથ્વી ત્રૈલોક્યં ચ ત્વયૈવ હિ ।
જનસ્તપસ્તથા સત્યં ત્વયા સર્વં તુ પાલ્યતે ॥ ૨૧॥

ન ત્વયા રહિતં કિઞ્ચિજ્જગત્સ્થાવરજઙ્ગમમ્ ।
વિદ્યતે ત્વદ્વિહીનં તુ સદ્યો નશ્યતિ વૈ જગત્ ॥ ૨૨॥

ત્વમાત્મા સર્વભૂતાનાં સતાં સત્ત્વસ્વરૂપવાન્ ।
રાજસાનાં રજસ્ત્વં ચ તામસાનાં તમ એવ ચ ॥ ૨૩॥

ચતુષ્પાદો ભવાન્ દેવ ચતુશ્શ્રૃઙ્ગસ્ત્રિલોચનઃ ।
સપ્તહસ્તસ્ત્રિબન્ધશ્ચ વૃષરૂપ નમોઽસ્તુ તે ॥ ૨૪॥

ત્વયા હીના વયં દેવ સર્વ ઉન્માર્ગવર્ત્તિનઃ ।
તન્માર્ગં યચ્છ મૂઢાનાં ત્વં હિ નઃ પરમા ગતિઃ ॥ ૨૫॥

એવં સ્તુતસ્તદા દેવૈર્વૃષરૂપી પ્રજાપતિઃ ।
તુષ્ટઃ પ્રસન્નમનસા શાન્તચક્ષુરપશ્યત ॥ ૨૬॥

દૃષ્ટમાત્રાસ્તુ તે દેવાઃ સ્વયં ધર્મેણ ચક્ષુષા ।
ક્ષણેન ગતસમ્મોહાઃ સમ્યક્સદ્ધર્મસંહિતાઃ ॥ ૨૭॥

અસુરા અપિ તદ્દૃષ્ટ્વા તતો બ્રહ્મા ઉવાચ તમ્ ।
અદ્યપ્રભૃતિ તે ધર્મ તિથિરસ્તુ ત્રયોદશી ॥ ૨૮॥

યસ્તામુપોષ્ય પુરુષો ભવન્તં સમુપાર્જયેત્ ।
કૃત્વા પાપસમાહારં તસ્માન્મુચ્યતિ માનવઃ ॥ ૨૯॥

યચ્ચારણ્યમિદં ધર્મ્મ ત્વયા વ્યાપ્તં ચિરં પ્રભો ।
તતો નામ્ના ભવિષ્યે તદ્ધર્મારણ્યમિતિ પ્રભો ॥ ૩૦॥

ચતુસ્ત્રિપાદ્ દ્વ્યેકપાચ્ચ પ્રભો ત્વં કૃતાદિભિર્લ્લક્ષ્યસે યેન લોકૈઃ ।
તથા તથા કર્મભૂમૌ નભશ્ચ પ્રાયોયુક્તઃ સ્વગૃહં પાહિ વિશ્વમ્ ॥ ૩૧॥

ઇત્યુક્તમાત્રઃ પ્રપિતામહોઽધુના સુરાસુરાણામથ પશ્યતાં નૃપ ।
અદૃશ્યતામગમત્ સ્વાલયાંશ્ચ જગ્મુઃ સુરાઃ સવૃષા વીતશોકાઃ ॥ ૩૨॥

ધર્મોત્પત્તિં ય ઇમાં શ્રાવયીત તદા શ્રાદ્ધે તર્પયેત પિતૃંશ્ચ ।
ત્રયોદશ્યાં પાયસેન સ્વશક્ત્યા સ સ્વર્ગગામી તુ સુરાનુપેયાત્ ॥ ૩૩॥

ઇતિ વરાહપુરાણે દ્વાત્રિંશાધ્યાયાન્તર્ગતં દેવૈઃ કૃતં ધર્મસ્તોત્રં સમાપ્તમ્ ।

વરાહપુરાણ । અધ્યાય ૩૨/૨૦-૩૩॥

varAhapurANa . adhyAya 32/20-33..

Proofread by PSA Easwaran

*Devaih Kritam Dharma Stotram*

pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*